# संस्कृत-वार्ता:

दिनाङ्क : 16.02.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां भारत-ए.आई-इम्पैक्ट-एक्सपो-विंशति-षड्विंशतिः इत्यस्य उद्घाटनम् करिष्यति ।
- भारत-ए.आई.इम्पैक्ट-शिखरसम्मेलनम् अद्य नवदिल्ल्याम् आरभते ।
- अनेन शिखरसम्मेलनेन भारतस्य कृत्रिमबुद्धिमत्तायाः जनाधारितप्रयासः द्योतते ।
- कश्मीरे, पूर्वोत्तरराज्येषु, माओवादिभिः प्रभावितेषु क्षेत्रेषु च हिंस्रघटनाः अशीतिप्रतिशन्मितं यावत् न्यूनाः अभवन् इति प्रोक्तवान् केन्द्रीय-गृहमन्त्री अमितशाहः ।
- टी-विंशति-क्रिकेट-विश्वचषके अफगानिस्तानदलम् ,यू-ए-ई दलं पञ्चक्रीडकानां हानौ पराजित्य प्रथमविजयम् अध्यगच्छत् ।

-----------------------------------------

<u>प्रधानमन्त्री-ए.आई-एक्सपो</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां भारत-ए.आई-इम्पैक्ट-एक्सपो-विंशति-षड्विंशतिः इत्यस्य उद्घाटनम् करिष्यति । पञ्चदिवसात्मकं प्रदर्शनं इण्डिया-ए.आई इम्प्याक्ट्-समिट् इत्यनेन सहैव आयोजितं भवति । अस्मिन् कार्यक्रमे आस्ट्रेलिया, जपान्, रशिया, युनाईटेड् किङ्गगडम्, फ़्रान्स्, जर्मनी, इटली, नीदरलैण्ड्स्, स्विट्ज़रलैण्ड्, सर्बिया, एस्टोनिया, ताजिकि स्तान्, आफ्रिका चेत्यादयः त्रयोदश-देशाः ए.आई. पर्यावरण-व्यवस्थायां अन्ताराष्ट्रिय-सहयोगं प्रदर्शयन्ति । प्रदर्शने त्रिशततः अधिकानि क्युरेटेड-प्रदर्शन-मण्डपानि, प्रत्यक्ष-प्रदर्शनानि च आयोज्यन्ते।

-----------------------------------------

## प्रधानमन्त्री-ए.आई

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रोक्तवान् यत् देशवासिनां कृते एषः अतीव गौरवास्पदः विषयः अस्ति यत् इण्डिया ए. आई. इम्पैक्ट्-समिट् इत्यस्य कृते समग्र-जगतः जनाः भारतं प्रति आगच्छन्ति । सामाजिक-सञ्जाल-माध्यमेन, श्रीमोदीवर्यः शिखरसम्मेलनाय विश्वनेतृभ्यः, उद्योगनेतृभ्यः, नवान्वेषकेभ्यः, नीतिनिर्मातृभ्यः, शोधकर्तृभ्यः, तन्त्रज्ञानप्रेमिभ्यः च स्वागतपूर्वकं वर्धापनं प्रायच्छत् । अयं देशः विज्ञान-तन्त्रज्ञान-क्षेत्रे द्रुतगत्या प्रगतिं कुर्वन् अस्ति इति प्रमाणम् अस्ति, वैश्विकविकासाय महत्त्वपूर्णं योगदानं अनेन प्रदत्तम् इत्यपि श्रीमोदी प्रत्यपादयत् । प्रधानमन्त्री उक्तवान् यत् अयं अवसरः देशस्य युवकानां क्षमताम् अपि दर्शयति । सः इत्यपि अधोरेखितवान् यत् सम्मेलनस्य विषयः सर्वजन-हिताय सर्वजन-सुखाय अथवा सर्वेभ्यः कल्याणाय, सर्वेभ्यः सुखाय इति अस्ति, यः मानवकेन्द्रितप्रगतिं साधयितुं कृत्रिमबुद्धिं उपयोक्तुं देशस्य सहभागितां प्रतिबद्धतां च प्रतिबिम्बयति।

-----------------------------------------

## भारत-ए. आई. इम्पैक्ट-समिट्

भारत-ए.आई.इम्पैक्ट-शिखरसम्मेलनम् अद्य नवदिल्ल्याम् आरभते । पञ्चदिवसीयं एतत् शिखरसम्मेलनं ग्लोबल-साऊथ् इत्यत्र आयोजितं प्रथमं वैश्विक-ए. आई. शिखरसम्मेलनं वर्तते । एतत् शिखर-सम्मेलनं वैश्विक-ए.आई. कार्यसूचीं निर्माय प्रमुख-मञ्चरूपेण भारतस्य भूमिकां सुदृढं करिष्यति । शिखरसम्मेलने शतं देशाः आमन्त्रिताः, द्विलक्षतः अधिकाः जनाः च अन्तर्जालमाध्यमेन पञ्जीकरणं कृतवन्तः। विंशतिदेशानाम् विश्वनेतारः अस्मिन् कार्यक्रमे भागं ग्रहीष्यन्ति । तेषु फ्रान्स्-देशस्य राष्ट्रपतिः इम्मैनुयेल्-मैक्रों, ब्राज़िल-देशस्य राष्ट्रपतिः लूयिज-इनासियो लुला-डा-सिल्वा, स्पेन-देशस्य राष्ट्रपतिः, पेड्रो साञ्चेस्-पेरेज़्-कास्टेजोन्, स्विट्ज़रलैण्ड्-देशस्य राष्ट्रपतिः, गाय-पार्मेलिन्, नीदरलैंड्स्-देशस्य प्रधानमन्त्री डिक् शूफ्, यु. ए. ई.-देशस्य अबुधाबी-नगरस्य युवराजः शेख्-खालिद-बिन-मोहम्मद-बिन-जायद-

अल-नह्यान्, मारिषस-देशस्य प्रधानमन्त्री डा. नवीनचन्द्रा-रामगुलाम, श्रीलङ्का-राष्ट्रपतिः अनुरा-कुमार-दिसानायका, सेशेल्स-देशस्य उपराष्ट्रपतिः, सेबेस्टियन-पिल्लै, भूटान-देशस्य प्रधानमन्त्री शेरिंग-तोब्गे च सन्ति । विदेशमन्त्रालयः अवदत् यत् बोलिविया, क्रोएशिया, एस्टोनिया, फिन्लैण्ड्, ग्रीस्, गयाना, कजाख्स्तान्, लिच्टेन्स्टैन्, सर्बिया, स्लोवाकिया चेत्यादीनां देशानां नेतारः अपि अस्मिन् सम्मेलने भागं ग्रहीष्यन्ति । अस्मिन् शिखरसम्मेलने पञ्चचत्वारिंशत-तः अधिकानां देशानाम् मन्त्रि-प्रतिनिधि-मण्डलानि भागं ग्रहीष्यन्ति ।

----------------------------------------

## सीईए-ए.आई. शिखरसम्मेलनम्

मुख्य-आर्थिक-परामर्शदः वी. अनन्त-नागेश्वरन्-वर्यः अद्य उक्तवान् यत् - शिक्षा-परिष्कार-माध्यमेन सामूहिक-आजीविकायाः क्षमतया सह ए.आई. इत्यस्य स्वीकरणम् अपि संयुज्य भारतं वैश्विकरूपेण नेतृत्वं कर्तुं शक्नोति । श्री-नागेश्वरन्-वर्यः नवदिल्ल्याम् आल-इम्पैक्ट्-समिट्-विंशति-षड्विंशति इति शिखरसम्मेलने फ्युचर्-आफ़्-एम्प्लॉयबिलिटी , ए.आई. इति प्रसङ्गद्वयम् अधिकृत्य आयोजिते सत्रे एतानि वक्तव्यानि प्रायच्छत् । सः अवदत् यत्, भारतं विशालतमेषु सामाजिकतन्त्रेषु अन्यतमं भवितुम् अर्हति यत्र सङ्घर्षस्य अपेक्षया मशीन-लर्निङ्ग, मानवसंसाधनानि च परस्परं पूरकानि भवितुं शक्नुवन्ति ।

एज्वर्व् इत्यस्य प्रमुखः सतीशः सीतारामय्यः अवदत् यत् ए.आई. इति द्रुततर-क्षमता-गुणक-रूपेण कार्यं करिष्यति सहैव ए. आई.-तरङ्गोपरि जीवनपर्यन्तम् शिक्षणक्षमता एव मूलमन्त्रं भविष्यति । सः पुनः अवदत् यत् ए.आई. इत्यनेन व्यापारेषु अधिकोत्पादकक्षमता प्राप्स्यते । सः इत्यपि अवदत् यत् ए.आई इत्यस्य माध्यमेन कार्यनिष्पादनस्य उत्तरदायित्वं स्वीकर्तुं अन्ततः एकः मनुष्यः भवेत् ।

-----------------------------------------

<u>उपराष्ट्रपतिः-एआई-प्रभावः</u>

उपराष्ट्रपतिः सी. पी. राधाकृष्णन-वर्यः इण्डिया ए.आई.-इम्पैक्ट्-समिट् इत्यस्य वर्णनं भारतस्य तादृश-प्रयासरूपेण अकरोत् यादृशे भारतीयः प्रथमः , लोकतान्त्रिकव्यवहारेण सह ए.आई. इत्यस्य च भविष्यनिर्माणस्य प्रयासः कृतः अस्ति । सामाजिक-सञ्जाल-माध्यमेन श्रीराधाकृष्णन्-वर्यः अवदत् यत् अस्मिन् शिखरसम्मेलने **<u>'सर्वजन हिताय, सर्वजन सुखाय'</u>** इति विषयः प्रतिबिम्बितः अस्ति ।

-----------------------------------------

<u>आर्मी-ए.आई. इम्पैक्ट-</u>

भारतीयसेना सैन्यक्षेत्रस्य विस्तरेण सह सुस्थिरतायाः सुदृढीकरणार्थं, परिचालन-सज्जतां वर्धितुं , भविष्यस्य सज्जतां, रक्षा-क्षमतानां निर्माणाय च ए.आई इत्यस्य एकीकरणस्य महत्त्वं अस्मिन् ए.आई-इम्पैक्ट इति शिखरसम्मेलने प्रकाशयिष्यति। सामाजिक-सञ्जाल-माध्यमेन, सेना अवदत् यत् आगन्तुकाः नवदिल्ल्याः भारतमण्डपे भारतीय-सेनायाः ए.आई.प्रदर्शिनी इत्यत्र अत्याधुनिकानि, द्वयोपयोगि-तन्त्रज्ञानानि च अन्वेष्टुं शक्नुवन्ति ।

-----------------------------------------

<u>अमितशाहः-दिल्ल्यारक्षिबलम्</u>

केन्द्रीय-गृहमन्त्री अमितशाहः प्रोक्तवान् यत् सप्तत्युत्तर-त्रिशतम् इति अनुच्छेदस्य अनन्तरं कश्मीरे, पूर्वोत्तरराज्येषु, माओवादिभिः प्रभावितेषु क्षेत्रषु च हिंस्रघटनाः अशीतिप्रतिशन्मितं यावत् न्यूनाः अभवन् । सः अकथय़त् यत् तद्दिवसः दूरं न अस्ति यदा एतानि क्षेत्राणि पूर्णतया हिंस्रघटनामुक्तानि भविष्यन्ति । सः नवदिल्ल्याम् आरक्षि-बलानां नवसप्ततितमे स्थापनदिवसकार्यक्रमे सम्बोधयन् आसीत् ।

------------------------------------------

<u>दिल्ली-विमानस्थानकम्</u>

दिल्ली-विमानस्थानकं भारतमण्डपम् इत्यत्र भारत-ए.आई. प्रभाव-शिखरसम्मेलम् अधिकृत्य यात्रिकान् सुविधाजनक-प्रवेशार्थं मेट्रो-यानस्य उपयोगं कर्तुम् सूचितम् अकरोत् । सामाजिक-सञ्जाल-माध्यमेन, दिल्ली-विमानस्थानकं यात्रिकान् विमानस्थानकं प्रति आगमन-प्रस्थानयोः सम्भाव्य-गमनागमन-विलम्बम् अधिकृत्य अस्मिन् विषये असूचयत् ।

------------------------------------------

<u>क्रिकेट</u>

पुरुषाणां टी-विंशति-क्रिकेट-विश्वचषके अफगानिस्तानदलम् अद्य अपराह्णे नवदिल्ल्यां अरुण-जेटली-क्रीडाङ्गणे यू-ए-ई दलं पञ्चक्रीडकानां हानौ पराजित्य अस्यां स्पर्धायां स्वकीयं प्रथमविजयम् अध्यगच्छत् ।

।। इति वार्ता: ।।